श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ एकादशाधिकशततमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ एकादशाधिकशततमः सर्गः ॥

## श्रीरामायणकाव्यस्योपसंहारस्तस्य महिमा च

एतावदेतदाख्यानं सोत्तरं ब्रह्मपूजितम्।
रामायणमिति ख्यातं मुख्यं वाल्मीकिना कृतम्॥ **7.111.1** ॥

ततः प्रतिष्ठितो विष्णुः स्वर्गलोके यथा पुरा।
येन व्याप्तमिदं सर्वं त्रैलोक्यं सचराचरम्॥ **7.111.2** ॥

ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः।
नित्यं शृण्वन्ति संहृष्टाः काव्यं रामायणं दिवि॥ **7.111.3** ॥

इदमाख्यानमायुष्यं सौभाग्यं पापनाशनम्।
रामायणं वेदसमं श्राद्धेषु श्रावयेद् बुधः॥ **7.111.4** ॥

अपुत्रो लभते पुत्रमधनो लभते धनम्।
सर्वपापैः प्रमुच्येत पादमप्यस्य यः पठेत्॥ **7.111.5** ॥

पापान्यपि च यः कुर्यादहन्यहनि मानवः।
पठत्येकमपि श्लोकं पापात् स परिमुच्यते॥ **7.111.6** ॥

वाचकाय च दातव्यं वस्त्रं धेनुहिरण्यकम्।
वाचके परितुष्टे तु तुष्टाः स्युः सर्वदेवताः॥ **7.111.7** ॥

एतदाख्यानमायुष्यं पठन् रामायणं नरः।
सपुत्रपौत्रो लोकेऽस्मिन् प्रेत्य चेह महीयते॥ **7.111.8** ॥

रामायणं गोविसर्गे मध्याह्ने वा समाहितः।
सायाह्ने वापराह्णे च वाचयन् नावसीदति॥ **7.111.9** ॥

अयोध्यापि पुरी रम्या शून्या वर्षगणान् बहून्।
ऋषभं प्राप्य राजानं निवासमुपयास्यति॥ **7.111.10** ॥

एतदाख्यानमायुष्यं सभविष्यं सहोत्तरम्।
कृतवान् प्रचेतसः पुत्रस्तद् ब्रह्माप्यन्वमन्यत॥ **7.111.11** ॥

अश्वमेधसहस्रस्य वाजपेयायुतस्य च।
लभते श्रवणादेव सर्गस्यैकस्य मानवः॥ **7.111.12** ॥

प्रयागादीनि तीर्थानि गङ्गाद्याः सरितस्तथा।
नैमिषादीन्यरण्यानि कुरुक्षेत्रादिकान्यपि॥ **7.111.13** ॥

गतानि तेन लोकेऽस्मिन् येन रामायणं श्रुतम्।
हेमभारं कुरुक्षेत्रे ग्रस्ते भानौ प्रयच्छति॥ **7.111.14** ॥

यश्च रामायणं लोके शृणोति सदृशावुभौ।
सम्यक्श्रद्धासमायुक्तः शृणुते राघवीं कथाम्॥ **7.111.15** ॥

सर्वपापात् प्रमुच्येत विष्णुलोकं स गच्छति।
आदिकाव्यमिदं त्वार्षं पुरा वाल्मीकिना कृतम्॥ **7.111.16** ॥

यः शृणोति सदा भक्त्या स गच्छेद् वैष्णवीं तनुम्।
पुत्रदाराश्च वर्धन्ते सम्पदः सन्ततिस्तथा॥ **7.111.17** ॥

सत्यमेतद् विदित्वा तु श्रोतव्यं नियतात्मभिः।
गायत्र्याश्च स्वरूपं तद् रामायणमनुत्तमम्॥ **7.111.18** ॥

यः पठेच्छृणुयान्नित्यं चरितं राघवस्य ह।
भक्त्या निष्कल्मषो भूत्वा दीर्घमायुरवाप्नुयात्॥ **7.111.19** ॥

चिन्तयेद् राघवं नित्यं श्रेयः प्राप्तुं य इच्छति।
श्रावयेदिदमाख्यानं ब्राह्मणेभ्यो दिने दिने॥ **7.111.20** ॥

यस्त्विदं रघुनाथस्य चरितं सकलं पठेत्।
सोऽसुक्षये विष्णुलोकं गच्छत्येव न संशयः॥ **7.111.21** ॥

पिता पितामहस्तस्य तथैव प्रपितामहः।
तत्पिता तत्पिता चैव विष्णुं यान्ति न संशयः॥ **7.111.22** ॥

चतुर्वर्गप्रदं नित्यं चरितं राघवस्य तु।
तस्माद् यत्नवता नित्यं श्रोतव्यं परमं सदा॥ **7.111.23** ॥

शृण्वन् रामायणं भक्त्या यः पादं पदमेव वा।
स याति ब्रह्मणः स्थानं ब्रह्मणा पूज्यते सदा॥ **7.111.24** ॥

एवमेतत् पुरावृत्तमाख्यानं भद्रमस्तु वः।
प्रव्याहरत विस्रब्धं बलं विष्णोः प्रवर्धताम्॥ **7.111.25** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे एकादशाधिकशततमः सर्गः॥